© 2018 IJSRST | Volume 4 | Issue 2 | Print ISSN: 2395-6011 | Online ISSN: 2395-602X

# कालिदासस्य शिक्षाशास्त्रपाण्डित्यम्



डा. नीलाभ तिवारी
सहायकाचार्यः
शिक्षाशास्त्रविभागः
राष्ट्रियसंस्कृतसंस्थानम्
श्री सदाशिवपरिसरः , पुरी

**शोधालेखसारः–** भारतीयशिक्षाक्षेत्रे केवलं पाश्चात्यानाम् आदर्शवादादिकं सिद्धान्तम् आप्तवचनमिव पालयन्तः शिक्षाशास्त्रिणः। वेदकालादारभ्य प्रचलितं भारतीयं शिक्षासिद्धान्तं न्यक्कुर्वन्ति । एतादृश्यां स्थितौ कालिदासस्य शिक्षाशास्त्रवैदुष्यम् सर्वत्र मुहुर्मुहुः परिचर्च्य आधुनिकाः भारतीयशिक्षापद्धतिं प्रति प्रेरणीयाः ।

**मुख्य शब्दः– भारतीयं, वर्णः, स्वरः, शीक्षां, व्याख्यास्यामः, न्यायाःA|**

प्रतिपलं प्रतिपदञ्च शिक्षते मानवः। शिक्षेयम् आजीवनम् अजस्त्रञ्च गतिमाना काचित् प्रक्रिया । षड् वेदाङ्गेषु अन्यतमं वेदाङ्गशिक्षेति । तैत्तिरियोपनिषदि **‘ॐ शीक्षां व्याख्यास्यामः’** इति कृत्वा उक्तं यत् **-वर्णः स्वरः। मात्रा बलम्। साम सन्तानः । इत्युक्तः शीक्षाध्यायः ।** तैत्तरियोपनिषद् – शीक्षावल्ली – द्वितीयनुवाकः अर्थात् वेदाङ्गशिक्षायां वैदिकस्वरवर्णादि प्रक्रियायाः विस्तृतं विवेचनं वर्तते । सर्वप्रतिभायुतो कविकुलगुरुः कालिदासः वेदवेदाङ्गादि शास्त्राणां विचक्षणः आसीत्, नास्त्यत्र कश्चन सन्देहः ।उक्तञ्च कुमारसम्भवे -

**उद्घातः प्रणवो यासां न्यायैस्त्रिभिरुदीरणम् ।**
**कर्मयज्ञः फलं स्वर्गस्तासां त्वं प्रभवो गिराम् ।।**[1]

अस्य श्लोकस्य टीकायां मल्लिनाथः लिखति –

**‘नीयन्ते एभिः अर्थविशेषाः इति न्यायाः स्वराः । उक्तञ्च स्वरविशेषादर्थप्रतिपत्तिः यासां गिरां त्रिभिः न्यायैः उदात्तानुदात्तरस्वरितैः उदीरणमुच्चारणम्’।**

अत्र कालिदासस्य न्यायशास्त्रवैचक्षण्येन सह शिक्षा वेदाङ्गज्ञानमपि उदात्तादिस्वरविवेचनेन सिद्धमेव । पश्यामो वयं कालिदासेन मालविकाग्निमित्रे लिखितम् एनं श्लोकम् –

**एकैश्वर्ये स्थितोऽपि प्रणतबहुफले यः स्वयं कृत्तिवासा**
**कान्तासंमिश्रदेहोऽप्यविषयमनसां यः परस्ताद्यतीनाम् ।**
**अष्टाभिर्यस्य कृत्स्नं जगदपि तनुभिर्बिभ्रतो नाभिमानः**
**सन्मार्गालोकनाय व्यपनयतु स बस्तामसीं वृत्तिमीशः ।।**[2]

IJSRST196592 | Received : 01 Jan 2018 | Accepted : 25 Jan 2018 | January-February-2018 [ (4) 2 1909-1914 ]

**पुराणमित्येव न साधु सर्वं न चापि काव्यं नवमित्यवद्यम् ।**
**सन्तः परीक्ष्यान्यतरद्भजन्ते मूढः परप्रत्ययनेयबुद्धिः ।।**[3]

शिक्षाजगति उक्तिरियं प्रवृत्तिमद्भ्यः सर्वेभ्यः चिरं स्मरणीयाः । सम्प्रति वयं शिक्षायां पाश्चात्यानाम् अन्धानुकरणं कुर्वन्तः स्वप्राच्यशिक्षापद्धतिं विस्मृत्य मैकालेपुत्राणां निर्माणे रताः स्मः । अद्यत्वे आवश्यकमिदं यत् कालिदासस्य शिक्षाशास्त्रवैदुष्यं परिशील्य वर्तमानशिक्षापद्धतौ तस्य समावेशः अस्माभिः प्रकल्पनीयः ।

कालिदासेन शिक्षार्थीनां समक्षे **"आज्ञा गुरुणा ह्यविचारणीया"** सदृशः आदर्शः उपस्थापितः । तेन शिक्षोद्देश्यानां शिक्षासम्बद्धसंस्काराणां शिक्षकछात्रयोः व्यक्तित्वस्य च सुगभीरं निदर्शनं स्वकाव्ये यत्र-तत्र कृतम् । तच्च अत्र विवेच्यते

**शिक्षोद्देश्यम् –**

कालिदासः कथयति यत् – शिक्षायाः उद्देश्यं जीविकोपार्जनम् एव नास्ति, अपितु शिक्षा जीवनं पवित्रं कर्तुं विभूषयितुञ्च नितान्तमावश्यकी । पार्वती जन्मप्रसङ्गे कालिदासः हिमालयस्य प्रशंसायां कथयति यत् हिमालयः पार्वत्या तथैव विभूषितः यथा स्वर्गः गङ्गया, विद्वानपुरुषः संस्कारयुक्तवाण्या च ।

**प्रभामहत्या शिखयेव दीपस्त्रिमार्गयेव त्रिदिवस्य मार्गः ।**
**संस्कारवत्येव गिरा मनीषी तया स पूतश्च विभूषितश्च ।।**[4]

अतः कालिदासोऽपि सम्पूर्णजीवनं पवित्रयितुं शिक्षां साधनत्वेन मन्यते । उपनिषत्सु शिक्षोद्देश्य विषये यत् कथितम् – तच्च अङ्गीकृत्य कालिदासोऽपि स्वकाव्यस्य आत्मतत्वरुपेण परिपोषयति । यथा –

**विद्याञ्चाविद्याञ्च यस्तद्वेदोभयँ स ह ।**
**अविद्यया मुत्युं तीर्त्वा विद्ययाऽमृतमश्नुते ।।**[5]

इति भावम् अङ्गीकृत्य विद्योपासकः कालिदासः कथयति यत् –

**'विद्यामभ्यसनेनैव प्रसादयितुमर्हति' ।**[6]

शास्त्रीयविद्या यावत् व्यवहारे नायाति, तावध्ययनं केवलं शब्दानां प्रपञ्चमात्रं वर्तते । यथोक्तम् –

**'शब्दजालं महारण्यं चित्तभ्रमणकारकम्'**

अतः अध्ययनस्य व्यवहारेण सामञ्जस्यमेव तस्य वास्तविकोद्देश्यं वर्तते । कालिदासः शिक्षायाः परमोद्देश्यं मोक्षप्राप्तिरिति मन्यते, परञ्च व्यावहारिकोद्देश्यानि अपि तेन न गौणी कृतानि । अतः लौकिक पारलौकिकी च विद्यां अभ्यस्य जीवनस्य सार्थक्यमवप्तुम् अभिलषति कालिदासः ।

**शिक्षासम्बद्धसंस्काराः –** गृह्यसूत्रेषु येषां संस्काराणां विधानं वर्तते - तेषांसंक्षिप्त परिचयः कालिदाससंस्कृतीषु अपि वर्तते । यद्यपि कालिदासकृतयः धर्मग्रन्थाः न सन्ति । तथापि यत्र यत्र बालकानां, विद्यार्थिनाञ्च वर्णनम् आयाति तत्र तत्र

कालिदासेन संस्कारेष्वपि अवधानं कृतम् । शास्त्रदृष्ट्या यदि बाल्यकालः सुसंस्कृतः भवेत् चेत् जीवनं सुसंस्कृतं भवत्येव ।अन्तः करणचतुष्टयस्य प्राधान्यदृष्ट्या संस्कारविधानं तदनुशिक्षाविधानं भारतीयचिन्तने प्रतिपदं प्राप्यते । यथा –

**“मनोबुद्धिरहङ्कारचित्तं करणमान्तरम् ।**
**संशयो निश्चयो गर्वः स्मरणं विषया इमे” ।।[7]**

शैशवावस्थायां - चित्तस्य प्राधान्यं भवति, चित्तप्राधान्ये स्मरणं सरलमेव मनोविज्ञानमिदं मनसि निधाय ऋषिभिः शैशवावस्थायां विद्यारम्भसंस्कारस्य विधानं कृतम् ।संस्कारेऽस्मिन् अक्षरज्ञानं लिपिज्ञानञ्च कारयते ।
कालिदासः कथयति यथा नदीमाश्रित्य वारिधिमवाप्तुं शक्यते तथैव लिपिशिक्षया वाङ्मये प्रवेष्टुं शक्यते ।

**स वृत्तचूलश्चलकाकपक्षकैरमात्यपुत्रैः सवयोभिरन्वितः ।**
**लिपेर्यथावद्ग्रहणेन वाङ्मयं नदीमुखेनेव समुद्रमाविशत् ।।[8]**

विद्यारम्भ संस्कारोऽयं शिशोः शास्त्रप्रवेशात् प्राक् अक्षरज्ञानार्थम् अतीवमहत्वपूर्णम् । अत्र रघोः विद्यारम्भसंस्कारस्य उल्लेखः कालिदासेन लिपिग्रहणसंज्ञया कृतः । नामकरणे वैभिन्न्यं भवेत् किन्तु समयस्य फलस्य च सम्बन्धे कालिदासस्य शिक्षाशास्त्रज्ञतां धर्मशास्त्रज्ञताञ्च प्रस्फुटत्यत्र ।
संस्कारेषु विद्यारम्भानन्तरम् उपनयनसंस्कारः शिक्षासम्बद्ध संस्कारेषु प्राधान्यं भजते । पाणिनिना अस्यापरं नाम – आचार्यकरणमिति प्रतिपादितम् ।

**सम्माननोत्सञ्जनाचार्यकरणज्ञानभृतिविगणनत्ययेषुनियः ।[9]**

अर्थात् गुरुणा अध्यापनाय छात्रस्य शिष्यभावेन स्वीकरणमेव उपनयनमिति । काशिकाकारः अपि इत्थं समर्थयति –

**‘स्वीकरणमेव उपनयनस्य धात्वर्थः’[10]**

ब्रह्मचारिणः ग्रहणमेव उपनयनमिति अथर्ववेदेऽपि निगदितम् –

**आचार्य उपनयमानो ब्रह्मचारिणं कृणुते गर्भमन्तः ।**
**तं रात्रीस्तिस्त्रं उदरे बिभर्ति तं जातं द्रष्टुमभिसंयन्ति देवाः ।।[11]**

अर्थात् आचार्यः स्वज्ञानरुपीशरीरगर्भे उपनयमानं छात्रं धारयति ।अत्र गुरुशिष्ययोः विशिष्टः कश्चन सम्बन्धः ऋषिभिः प्रतिपादितः । रघुवंशे कालिदासः रघुविषये कथयति यत् असौ ब्रह्मचर्यस्य नियमान् परिपाल्य अस्त्रविद्यां पितुः अपठत् ।

**त्वचं स मेध्यां परिधाय रौरवीमशिक्षितास्त्रं पितुरेव मन्त्रवत् ।**
**न केवलं तद्गुरु रेकपार्थिवः क्षितावभूदेकधनुर्धरोऽपि सः ।।[12]**

अपि च –

**अथोपनीतं विधिवद्विपश्चितो विनिन्युरेनं गुरवो गुरुप्रियम् ।**
**अबन्ध्ययत्नाश्च वभूवुरत्र ते क्रिया हि वस्तूपहिता प्रसीदति ।।[13]**

तथैव वेदारम्भसमावर्तनादि शिक्षासम्बद्धसंस्कारेषु कालिदासस्य वैचक्षण्यं सिद्धमेव ।

**शिक्षकः –** बोधकः, शिक्षकः बोध्यो शिष्यः इत्युभयं शिक्षणस्य यशसे कल्पते । प्रशस्तशिलया श्रेष्ठशिल्पीना निर्मितं शिल्पमिव उत्तमाध्यापकेन सुयोग्यशिष्ये विन्यस्यं ज्ञानं सर्वोत्कृष्टताम् अवाप्नोति । मालविकाग्निमित्रनाटके परिव्राजिकामाध्यमेन कालिदासः साधुशिक्षकस्य स्वरूपं प्रतिपादयति ।

**शिलष्टा क्रिया कस्यचिदात्मसंस्था संक्रान्तिरन्यस्य विशेषयुक्ता ।**
**यस्योभयं साधु स शिक्षकाणां धुरि प्रतिष्ठापयितव्य एव ।।**[14]

श्लोकोऽयं सुयोग्यशिक्षकस्य सम्पूर्णं स्वरूपं चित्रयति । कस्यचिद् शिक्षकस्य विषयज्ञानं परिपूर्णं वर्तते, परञ्च असौ शिष्येषु स्वज्ञानं संक्रामयितुं प्रभावशाली नैव भवति । तथैव केचन विषयस्य गभीरं ज्ञानं विना अपि स्वाधिगतविषयं शिष्येषु संक्रामयितुं निष्णाताः भवन्ति । द्विधाशिक्षकाः श्लाघनीयाः एव परं सर्वोत्तमाः इति वक्तुं न शक्यते । अतः कालिदासेन भणितम् यस्योभयं अर्थात् विषयज्ञानं, सङ्क्रामणकौशलञ्च सः उत्तमः अध्यापकः । अद्यत्वे छात्रः यदि विषयं सम्यग्तया नाधिगच्छति अपि च तस्य परिणामः उत्तमः नैव भवति चेत् शिक्षकः कथयति यत् छात्रस्य मनः एव नास्ति, छात्रस्य वौद्धिकक्षमता उत्तमा नास्ति । विषयेस्मिन् कालिदासस्य मतमस्ति यत् छात्रस्यास्य दोषस्य कारणं शिक्षक अपि यथा संवादेऽस्मिन् -

**देवी – यदा पुनर्मन्दमेधा शिष्या उपदेशं मलिनयन्ति तदाऽऽचार्यस्य न दोषः ।**
**राजा – देवी ! एवमापठ्यते । विनेतुरद्रव्यपरिग्रहोऽपि बुद्धिलाघवं प्रकाशयतीति ।**[15]

अनेन स्पष्टं यत् छात्रस्य क्षमतानुरुपं रुच्यानुरुपम् अभिवृत्यानुरुपञ्च शिक्षा यदि तस्मै नैव दीयते चेत् अध्यापकस्य दोषोऽयम् । स्पष्टं यत् – शिक्षकेण छात्रस्य सर्वविधपूर्वज्ञानं सुविचिन्त्य तस्य शिक्षणं कर्तव्यम् । आचार्यस्य सामर्थ्यम् योग्यशिष्यैः एव प्रकाश्यते । आचार्याणां ज्ञानं न केवलं जीवकायै अपितु सन्दर्भानुगुणं स्वप्रतिभाप्रकाशनाय मोक्षम् अवाप्तये च कल्पते । अन्यथा सः ज्ञानपण्यः गुरुः वणिक्सदृशः जीवति उक्तञ्च –

**लब्धास्पदोऽस्मीति विवादभिरोस्तितिक्षमाणस्य परेण निन्दाम् ।**
**यस्यागमः केवलजीवकायै तं ज्ञानपण्यं वणिजं वदन्ति ।।**[16]

अतः केवलं वाणिज्यवत् अध्यापनं नैव कर्तव्यं आदर्शशिक्षकेण ।

**छात्रः** – अथर्ववेदे कथितं यत् –

ब्रह्मणः अनुशासने आचरणशीलः ब्रह्मचारी द्युलोकं भूलोकञ्च स्वानुकूलं निर्माति । देवाः तस्मिन् निवसन्ति । अथ चासौ आचार्यस्य परिपूर्णतायाः हेतुर्भवति ।

**ब्रह्मचारीस्णश्चरति रोदसी उभे तस्मिन् देवाः संमनसो भवन्ति ।**
**स दाधार पृथिवीं दिवं च स आचार्यः तपसा पिपर्ति ।।**[17]

छात्राः ब्रह्मचर्यस्य पालनं कुर्वन् शिक्षायाः सफलतायै यतते स्म । ब्रह्ममुहुर्ते जागरणं त्रिकालसंध्यादीनां नियमानां परिपालनस्य वर्णनं कालिदासेन बहुत्र कृतम् । कुमारसम्भवे शङ्करस्य मुखात् सन्ध्यावन्दनस्य कियत् सुन्दरं वर्णनं वर्तते –

**अद्रिराजतनये तपस्विनः पावनाम्बुविहिताञ्जलिक्रियाः ।**

**ब्रह्म गूढमभिसंध्यमादृताः शुद्धये विधिविदो गृणन्त्यमी ।।[18]**

पार्वतीं कथयति शङ्करः सर्वक्रियाज्ञातारः तपस्विनः पवित्रजलेन सूर्याय सन्ध्याकाले अर्घ्यं सम्प्रदाय आत्मशुद्धये उपांशुजपं कुर्वन्तः सन्ति ।
अपि च –

**वनान्तरादुपावृत्तैः समित्कुशफलाहारैः ।**
**पूर्यमाणमदृश्याग्निप्रत्युद्यातैस्तपस्विभिः ।।[19]**

**अर्थात्** – सन्ध्याकर्मणे ब्रह्मचारिणः समितकुशादीनां सङ्कलनं स्वयं वनं गत्वा कुर्वन्ति स्म । अर्थात् छात्रेण स्वस्य सर्वाणि कार्याणि स्वयंसम्पाद्य अध्ययनं कर्तव्यमिति भावः कालिदासस्य । अद्यत्वे छात्राणां हस्ते सर्वविधसौविध्यम् अभिभावकाः कल्पयन्ति । तेन छात्रेषु आत्मनिर्भरतायाः आत्मविश्वासस्य च अभावो दृश्यते । कालिदासस्य मतानुसारं स्वावलम्बलनं छात्रस्य कृते शिक्षाप्राप्तये अत्यावश्यकं वर्तते । छात्रैः सर्वदैव ज्येष्ठानां आज्ञा पालनीया तेनैव तस्य सर्वविधोन्नतिः शक्यते । उक्तञ्च –

**स शुश्रुवान्मातरि भार्गवेण पितुर्नियोगात्प्रहृतं द्विषद्वत् ।**
**प्रत्यग्रहीदग्रजशासनं तदाज्ञा गुरूणां ह्यविचारणीया ।।[20]**

कदाचित् छात्राः विषमपरिस्थितीषु कार्यम् आसाध्यम् इति चिन्तयन्तः व्याकुलाः भवन्ति । असाध्यमपि साधयितुं सर्वत्र अवसराः भवन्ति एव छात्रान् प्रेरयति सूक्तिरियम् –

**अथवा भवितव्यानां द्वाराणि भवन्ति सर्वत्र ।[21]**

एतादृशं सकारात्मकं चित्तनं कार्यसिद्धये पथं प्रदर्शयति । कर्तव्यनिरताः छात्राः स्वप्रयत्नेन किमपि साधयितुं शक्नुवन्ति । भाग्यं प्रयत्नश्चेति उभयं किं वा न साधयेत् ।

**सतां हि संदेहपदेषु वस्तुषु प्रमाणमन्तः करणप्रवृत्तयः ।[22]**

---

जगत्यस्मिन् वहुत्र सन्दिग्धपरिस्थितीषु पतामः, परस्परं विरोधिनो नियमाः बहुविधकथनं बहुश्रुतमपि संशयवशात् मनः आन्दोलयति । इदं वा तद् वा वास्तवं स्याद् इति प्रमाणमन्विषति । सत्सु परस्परं विरोधेषु किमपि न प्रभवति चेत् तथा स्थितौ सतां छात्राणां मन्तः – करणप्रवृत्तयः परमप्रमाणं इति आचर्षृते कालिदासः ।

अद्यत्वे भारतीयशिक्षाक्षेत्रे केवलं पाश्चात्यानाम् आदर्शवादादिकं सिद्धान्तम् आप्तवचनमिव पालयन्तः शिक्षाशास्त्रिणः। वेदकालादारभ्य प्रचलितं भारतीयं शिक्षासिद्धान्तं न्यक्कुर्वन्ति । एतादृश्यां स्थितौ कालिदासस्य

शिक्षाशास्त्रवैदुष्यम् सर्वत्र मुहुर्मुहुः परिचर्च्य आधुनिकाः भारतीयशिक्षापद्धतिं प्रति प्रेरणीयाः । कथमपि कठिनतपसा दैत्यबलेन शिक्षाव्यवस्थायां स्वसिद्धान्तः पुनः प्रतिष्ठापयितव्य एव ।

उपर्युक्तसंक्षिप्तविवेचनेन स्पष्टमिदं यत् महाकविकालिदासस्य शिक्षाशास्त्रपाण्डित्यं नितान्तमुपादेयम् उत्साहवर्धकञ्चास्ति । महाकवेः शिक्षासम्बद्धचिन्तनं साम्प्रतिके प्रजातन्त्रात्मिके काले सर्वेभ्यः वर्गेभ्यः नितरामुपयोगी वर्तते ! इति शम् ।

## <u>सन्दर्भ ग्रन्थ सूची</u>


1. **कुमार सम्भव 2-12**
2. **मालवि. – 1-1**
3. **तत्रैव. – 1-2**
4. ईशावास्योपनिषद्, ११
5. रघुवंशम्, 1-88
6. धर्मराजाध्वरीन्द्र विरचिता वेदान्तपरिभाषा/प्रत्यक्षपरिच्छेदः, पंकज पब्लिकेशन – दिल्ली 2003
7. रघुवंशम् – 3-28
8. पाणिनि अ. 1-3-36
9. काशिका – 1-3-36
10. अथर्ववेद 11-7-3
11. रघुवंशम् 3-31
12. **तत्रैव** .3-29
13. मालवि. 2-16
14. **तत्रैव**. 1-16
15. **तत्रैव**. 1-17
16. अथर्ववेद – 11-7-1
17. कुमारसम्भवम्. – 8-47
18. रघुवंशम् – 1-49
19. **तत्रैव** 14-46
20. अभिज्ञानशा. – 1-16
21. **तत्रैव**. 1-21